# श्रीगायत्रीस्तोत्रसप्तकम्

**प्रो. ( डॉ. ) ताराशंकरशर्मपाण्डेय**
**जयपुरम्**

**भूदेवमातापरा**

कल्याणाकरकल्यकालकलिता कारुण्यकल्लोलिनी
कल्याणी कमलाधिकारकमना काम्या कलानां निधिः।
सन्ध्यायां जपतो जनस्य कुरुते सार्वत्रिकं मङ्गलं
गायत्री रविमण्डलाणुप्रसवा भूदेवमातापरा।। 01।।

**यास्ते द्विजाराधिता**

भानोर्भर्गभवा भवातिविभवा भाग्याभ्रमातङ्गिनी
भद्राधारविभावभूतिलसिता भूयाद्भवाभीप्सिता।
भक्त्युद्दीप्तमनःप्रसन्नवदना यास्ते द्विजाराधिता
गायत्री रविमण्डलाणुप्रसवा भूदेवमातापरा।। 02 ।।

**भास्वज्जगच्चेतना**

ओजोमण्डलदीप्तभानुवलया भास्वज्जगच्चेतना
ब्रह्मास्वादसहोदरी सुमनसां सौरभ्यकेन्द्रस्थितिः।
मन्त्राधीनप्रसन्नताऽसुसरिता–स्त्रोतोरसा राजते
गायत्री रविमण्डलाणुप्रसवा भूदेवमातापरा।। 03 ।।

**टिप्पणी–**

1. **सुमनसाम्** = पुंसि देवतानां विदुषां वा, चेत् स्त्रीलिंगे, 'सुष्ठु मन्यते जनैर्मनोज्ञत्वात् शोभनं मनोऽस्यामिति वा सुमनाः सान्ता स्त्रीलिङ्गा च ।'स्त्रियां सुमनसो भूम्नि पुष्पे जातौ च भेदतः । विदुष्यति यदा दृष्टस्तदा भेदेन शिष्यते॥' इति व्याडिः ।'सुमनाः पुष्पमालत्योः स्त्रियाम् । ' इति सान्तेषु मेदिनी ।

2. **सौरभ्यम्** = सौरभम्, सौगन्धम्, गुणगौरवं वा। **3. स्त्रोतोरसा** = मूलोद्गमभूमिः, रसा = भूमिः।

### ब्रह्मैकयोगात्मवित्

सन्ध्यावन्दनकर्मपुण्यविशदाऽऽत्मालोकतेजोद्विजो
भानोर्लोकमनोनिवेशरसित–ब्रह्मैकयोगात्मवित्।
सम्यग्ज्ञानपरायणाधिकृतये मोक्षं प्रदत्ते वरं
गायत्री रविमण्डलाणुप्रसवा भूदेवमातापरा।। 04 ।।

### धर्मास्पदे शोभते

कामार्थौ भवतां शरीरनिरतौ धर्मार्थनिष्ठायुता–
वाद्यन्तौ टकितौ पराधिकरणौ धर्मश्च मोक्षस्ततः।
आत्मारामविहारभूमिलसिते धर्मास्पदे शोभते
गायत्री रविमण्डलाणुप्रसवा भूदेवमातापरा।। 05 ।।

### माङ्गल्यनिःश्रेयसम्

सन्ध्योपासनजापपुण्यप्रसवप्राप्यानुसन्धानहा
वैकुण्ठाश्रयमानसोत्फलितचित् षट्कर्मसिद्धोऽस्ति ते।
सद्धर्माध्वगसाधवे सुददते माङ्गल्यनिःश्रेयस्
गायत्री रविमण्डलाणुप्रसवा भूदेवमातापरा।। 06 ।।

### या सन्ततं त्रायते

सर्वे वैष्णवशैवशाक्तप्रमुखाः सन्ध्याक्रियातत्पराः
प्रातःकालजपे समाधिनिपुणा गायन्ति सेवापराः।
गायन्तं बहुमानरागपुरतो् या सन्ततं त्रायते
गायत्री रविमण्डलाणुप्रसवा भूदेवमातापरा।। 07 ।।

इति जयपुरवास्तव्येन प्रो.ताराशंकरशर्मपाण्डेयेन विरचित्
गायत्रीस्तोत्रसप्तकं पूर्णतामगात्।